શિવસૂત્ર

## 1- શામ્ભવોપાય

ચૈતન્યમાત્મા . ૧- ૧.
જ્ઞાનં બન્ધઃ . ૧- ૨.
યોનિવર્ગઃ કલાશરીરમ્ . ૧- ૩.
જ્ઞાનાધિષ્ઠાનં માતૃકા . ૧- ૪.
ઉદ્યમો ભૈરવઃ . ૧- ૫.
શક્તિચક્રસન્ધાને વિશ્વસંહારઃ . ૧- ૬.
જાગ્રત્સ્વપ્નસુષુપ્તભેદે તુર્યાભોગસંભવઃ . ૧- ૭.
જ્ઞાનં જાગ્રત્ . ૧- ૮.
સ્વપ્નો વિકલ્પાઃ . ૧- ૯.
અવિવેકો માયાસૌષુપ્તમ્ . ૧- ૧૦.
ત્રિતયભોક્તા વીરેશઃ . ૧- ૧૧.
વિસ્મયો યોગભૂમિકાઃ . ૧- ૧૨.
ઇચ્છા શક્તિરુમા કુમારી . ૧- ૧૩.
દૃશ્યં શરીરમ્ . ૧- ૧૪.
હૃદયે ચિત્તસંઘટ્ટાદ્ દૃશ્યસ્વાપદર્શનમ્ . ૧- ૧૫.
શુદ્ધતત્ત્વસન્ધાનાદ્ વા અપશુશક્તિઃ . ૧- ૧૬.
વિતર્ક આત્મજ્ઞાનમ્ . ૧- ૧૭.
લોકાનન્દઃ સમાધિસુખમ્ . ૧- ૧૮.
શક્તિસન્ધાને શરીરોત્પત્તિઃ . ૧- ૧૯.
ભૂતસન્ધાન ભૂતપૃથક્ત્વ વિશ્વસંઘટ્ટાઃ . ૧- ૨૦.
શુદ્ધવિદ્યોદયાચ્ચક્રેશત્વ સિદ્ધિઃ . ૧- ૨૧.
મહાહ્રદાનુસન્ધાનાન્મન્ત્રવીર્યાનુભવઃ . ૧- ૨૨.

## ૨- શાક્તોપાય

ચિત્તં મન્ત્રઃ . ૨- ૧.

પ્રયત્નઃ સાધકઃ . ૨- ૨.
વિદ્યાશરીરસત્તા મન્ત્રરહસ્યમ્ . ૨- ૩.
ગર્ભે ચિત્તવિકાસોઽવિશિષ્ટ વિદ્યાસ્વપ્નઃ . ૨- ૪.
વિદ્યાસમુત્થાને સ્વાભાવિકે ખેચરી શિવાવસ્થા . ૨- ૫.
ગુરુરુપાયઃ . ૨- ૬.
માતૃકાચક્રસમ્બોધઃ . ૨- ૭.
શરીરં હવિઃ . ૨- ૮.
જ્ઞાનં અન્નમ્ . ૨- ૯.
વિદ્યાસંહારે તદુત્થ સ્વપ્ન દર્શનમ્ . ૨- ૧૦.

## ૩- આણવોપાય

આત્મા ચિત્તમ્ . ૩- ૧.
જ્ઞાનં બન્ધઃ . ૩- ૨.
કલાદીનાં તત્ત્વાનાં અવિવેકો માયા . ૩- ૩.
શરીરે સંહારઃ કલાનામ્ . ૩- ૪.
નાડી સંહાર ભૂતજય ભૂતકૈવલ્ય ભૂતપૃથક્ત્વાનિ . ૩- ૫.
મોહાવરણાત્ સિદ્ધિઃ . ૩- ૬.
મોહજયાદ્ અનન્તાભોગાત્ સહજવિદ્યાજયઃ . ૩- ૭.
જાગ્રદ્ દ્વિતીયકરઃ . ૩- ૮.
નર્તક આત્મા . ૩- ૯.
રઙ્ગોઽન્તરાત્મા . ૩- ૧૦.
પ્રેક્ષકાણીન્દ્રિયાણિ . ૩- ૧૧.
ધીવશાત્ સત્ત્વસિદ્ધિઃ . ૩- ૧૨.
સિદ્ધઃ સ્વતન્ત્રભાવઃ . ૩- ૧૩.
યથા તત્ર તથાન્યત્ર . ૩- ૧૪.
વિસર્ગસ્વાભાવ્યાદ્ અબહિઃ સ્થિતેસ્તત્સ્થિતિઃ . ૩- ૧૫.
બીજાવધાનમ્ . ૩- ૧૬.

આસનસ્થઃ સુખં હ્રદે નિમજ્જતિ . ૩- ૧૭.
સ્વમાત્રા નિર્માણં આપાદયતિ . ૩- ૧૮.
વિદ્યા અવિનાશે જન્મ વિનાશઃ . ૩- ૧૯.
કવર્ગાદિષુ માહેશ્વર્યાદ્યાઃ પશુમાતરઃ . ૩- ૨૦.
ત્રિષુ ચતુર્થં તૈલવદાસેચ્યમ્ . ૩- ૨૧.
મગ્નઃ સ્વચિત્તેન પ્રવિશેત્ . ૩- ૨૨.
પ્રાણ સમાચારે સમદર્શનમ્ . ૩- ૨૩.
મધ્યેઽવર પ્રસવઃ . ૩- ૨૪.
માત્રાસ્વપ્રત્યય સન્ધાને નષ્ટસ્ય પુનરુત્થાનમ્ . ૩- ૨૫.
શિવતુલ્યો જાયતે . ૩- ૨૬.
શરીરવૃત્તિર્વ્રતમ્ . ૩- ૨૭.
કથા જપઃ . ૩- ૨૮.
દાનં આત્મજ્ઞાનમ્ . ૩- ૨૯.
યોઽવિપસ્થો જ્ઞાહેતુશ્ચ . ૩- ૩૦.
સ્વશક્તિ પ્રચયોઽસ્ય વિશ્વમ્ . ૩- ૩૧.
સ્તિથિલયૌ . ૩- ૩૨.
તત્ પ્રવૃત્તાવપ્યનિરાસઃ સંવેત્તૃભાવાત્ . ૩- ૩૩.
સુખ દુઃખયોર્બહિર્મનનમ્ . ૩- ૩૪.
તદ્વિમુક્તસ્તુ કેવલી . ૩- ૩૫.
મોહપ્રતિસંહ્તસ્તુ કર્માત્મા . ૩- ૩૬.
ભેદ તિરસ્કારે સર્ગાન્તર કર્મત્વમ્ . ૩- ૩૭.
કરણશક્તિઃ સ્વતોઽનુભવાત્ . ૩- ૩૮.
ત્રિપદાદ્યનુપ્રાણનમ્ . ૩- ૩૯.
ચિત્તસ્થિતિવત્ શરીર કરણ બાહ્યેષુ . ૩- ૪૦.
અભિલાષાદ્બહિર્ગતિઃ સંવાહ્યસ્ય . ૩- ૪૧.
તદારૂઢપ્રમિતેસ્તત્ક્ષયાજ્જીવસંક્ષયઃ . ૩- ૪૨.

ભૂતકચ્ચુકી તદા વિમુક્તો ભૂયઃ પતિસમઃ પરઃ . ૩- ૪૩.
નૈસર્ગિકઃ પ્રાણસંબન્ધઃ . ૩- ૪૪.
નાસિકાન્તર્મધ્ય સંયમાત્ કિમત્ર સવ્યાપસવ્ય સૌષુમ્નેષુ . ૩- ૪૫.
ભૂયઃ સ્યાત્ પ્રતિમીલનમ્ . ૩- ૪૬.

ૐ તત્ સત્